क्रियाकालानामादेशः । भवति चात्र । वीजं चिकित्सितस्यैतत्समासेन प्रकीर्त्तितम् । सविंशमध्यायशतमस्य व्याख्या भविष्यति । तच्च सविंशमध्यायशतं पञ्चसु स्थानेषु । तत्र सूत्रस्थाननिदानशारीरचिकित्सितकल्पेष्वर्थवशात्संविभज्योत्तरे तन्त्रे शेषानर्थान् व्याख्यास्यामः”। चरके तु त्रिस्कन्धमित्युक्तम् तच्च हेतुलिङ्गौषधरूपस्कन्धत्रयं बोध्यम् । अयञ्चायुर्वेद अष्टादशविद्यान्तर्गतः । “आयुर्वेदो धनुर्वेदो गान्धर्व्वश्चेति ते त्रय” इति ५२५ पृष्ठे अष्टादशविद्याशब्दे उक्तवाक्यात् । अस्मिन् शास्त्रे द्विजानामेवाधिकारोनान्येषां यथाह सुश्रुतः । “अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः । ब्राह्मणक्षत्रियवैश्यानामन्यतममन्वयवयःशीलशौर्य्यशौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रमृजुवक्त्राक्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत् । अतो विपरीतगुणं नोपनयेत्” ।

विप्रेण वैश्यकन्यायामुत्पन्नस्याम्बष्ठस्यापि द्विजधर्म्मतया उपनयनादिसंस्कारवत्त्वात् “अम्बष्ठस्य चिकित्सितम्” इति मनूक्तेश्च अत्राधिकार इति भेदः । तत्रायं विवेकः द्विजमात्राणां चिकित्सितेऽधिकारेऽपि तत्रत्यवृत्तिग्रहणे तु तेषां निन्द्यतैव । “पूयं चिकित्सकस्यान्नमिति” मनुना निन्दितत्वात् । अम्बष्ठानां तु तद्वृत्तौ दोषाभावः मनुना “सूतानामश्वसारथ्यमम्बष्ठस्य चिकित्सितम्” इत्यनेन तेषां चिकित्सावृत्तिकत्वेनाभिधानात् अम्बष्ठस्य च यथोपनयनेऽधिकारस्तथाऽम्बष्ठशब्दे २२८ पृष्ठे निरूपितम् । अतएव “भिषक् केशवनन्दनः । वोपदेवश्चकारेदं विप्रोवेदपदास्पदम्” । विप्रवोपदेवस्य पितुः केशवस्य भिषक्त्वं स्वयमेव तेनोक्तम् । तस्य निन्दितत्वे तन्नोच्येत इति द्रष्टव्यम् । अन्यत्र चायुर्वेदस्य चतुर्व्यूहत्वमुक्तं रोगरोगनिदानरोगनिवृत्तितदुपायरूपविषयचातुर्विध्यात् । “सचायुर्वेदः नरगजाश्वगोवृत्त्याधिकारभेदेन पञ्चविधः तत्र नरायुर्वेदः चरकसुश्रुतादिर्लोकप्रसिद्धः गजायुर्वेदोऽश्वायुर्वेदोऽपि शालिहोत्रकृतः तयोश्च लोके प्रचाराभावात् अग्निपुराणतः समुद्धृत्यात्रतौ दर्श्येते तत्र गजायुर्वेदो यथा

“गजलक्ष्म चिकित्सां च लोमपाद ! वदामि ते” इत्युपक्रम्य

“पाकलेषु तु सर्व्वेषु कर्त्तव्यमनुवासनम् । घृततैलपरीपाकं स्थानं वातविवर्जितम् । स्कन्धेषु च क्रिया कार्य्या तथा पाकलनृप ! । गोमूत्रं पाण्डुरोगेषु रजनीभ्यां घृतं द्विज ! । आनाहे तैलसिक्तस्य निषेकस्तस्य शस्यते । लवणैः पञ्चभिर्मिश्रा प्रतिपानाय वारुणी । विड़ङ्गत्रिफलाव्योषसैन्धवैः कवलान् कृतान् । मूर्च्छासु भोजयेन्नागं क्षौद्रतोयञ्च पाययेत् । अभ्यङ्गः शिरसः शूले नस्यञ्चैव प्रशस्यते । नागानां स्नेहकटुकैः पादरोगानुपक्रमेत् । पश्चात्कल्ककषायेण शोधनञ्च विधीयते । शिखितित्तिरिलावानां पिप्पलीमरिचान्वितैः । रसैः समर्पयेन्नागं वेपथुर्यस्य जायते । बालं विल्वं तथा लोध्रं धातकी सितया सह । अतीसारविनाशाय पिण्डीं भुञ्जीत कुञ्जरः । नस्यं करग्रहे देयं घृतं लवणसंयुतम् । मागधीनागराजाजीयवागूर्मुद्गखण्डकान्विताः । उत्कर्णके तु दातव्यो वाराहश्च तथा रसः । दशमूलकुलत्थाम्लकाकमाचीविपाचितम् । तैलप्राशनसंयुक्तं गलग्रहगदापहम् । अष्टाभिर्लवणैः पिष्टैः प्रसन्नं पाययेद्घृतम् । मूत्रलंशेखरावीजं क्वथितं त्रपुषस्य च । त्वग्दोषेषु पिबेच्चैव वृषं वा क्वथितं द्विपः । गवां मूत्रविड़ङ्गानि कृमिकोष्ठेषु शस्यते । शृङ्गवेरकणाद्राक्षाशर्कराभिः शृतं पयः । क्षतक्षयकरं पानं तथा मांसरसः शुभः । अक्षोदनं व्योषयुतमरुचौ तु प्रशस्यते । त्रिवृद्व्योषाग्निदन्त्यर्कश्यामाक्षीरेभपिप्पली । एतैर्गुल्महरः स्नेहः कृतश्चैव तथा रसः । भेदनद्रावणाभ्यङ्गस्नेहपानानुवासनैः । सर्वानेव समुत्पन्नान् विद्रवान् समुपाहरेत् । षष्टिकं मुद्गयूषेण सारदेन तथा पिबेत् । बालविल्वैस्तथा लेपः कुष्ठरोगे प्रशस्यते । विड़ङ्गेन्द्रयवौ हिङ्गु सबलं रजनीद्वयम् । पूर्वाह्णे पाययेत् पिण्डान् सर्वशूलोपशान्तये । प्रधानभोजने तेषां षष्टिकव्रीहिशालयः । मध्यमौ यवगोधूमौ शेषा दन्तिनि चाधमाः । यवश्चैव तथैवेक्षुर्नागानां बलवर्द्धनः । नागानां यवसं शुष्कं तथा वातप्रकोपणम् । मदक्षीणस्य नागस्य पयः पानं प्रशस्यते । दीपनीयैस्तथा द्रव्यैः शृतोमांसरसस्ततः । वायसः कुरभश्चोभौ काकोलूककुलाहविः । भवेत् क्षौद्रेण संयुक्तं पिण्डोयुद्धे मदाय हि । कटुमत्स्या विड़ङ्गानि क्षीरकोषातकीपयः । हरिद्रा चेति धूमोऽयं कुञ्जरस्य जयावहः । पिप्पली तण्डुलास्तैलं माध्वीकं माक्षिकन्तथा । नेत्रयोः परिषेकोऽयं दीपनीयः प्रशस्यते । पुरीषं च कषायाश्च तथा पारावतस्य च । क्षीरवृक्षकरीरस्य प्रसन्नायेष्टमञ्जनम् । अनेनाञ्जितनेत्रस्तु करोति कदनं रणे । उत्पलानि च नीलानि मुस्तं तगरमेव च । तण्डुलोदकपिष्टानि नेत्रनिर्वापणं परम् । नखवृद्धौ नखच्छेदः तैलसेकश्च मास्यपि । शय्यास्थानं भवेच्चास्य करीषैः पांशुभिस्तथा । शरन्निदा-